समानता शैक्षिकसमानता च

- *डॉ. नितिनकुमारजैनः*

शोधसारांशः –

समानता अत्यन्तं व्यापकः कश्चन सम्प्रत्ययः । समानो व आकूतिः समाना ह्रदयाणि वः इत्यादि वेदमन्त्रैः समानताप्रत्ययस्य अत्यन्तं प्राचीनत्वं सिद्ध्यति। स च समानता सम्प्रत्ययः पत्रे अस्मिन्। द्विविधसम्प्रत्ययपक्षः , त्रिविधसम्प्रत्ययपक्षः, चतुर्विधसम्प्रत्ययपक्षः इति त्रिषु पक्षेषु निरूपितः । एतैः सहैव समानता- समतयोः भेदः प्रदर्शितः ।

प्रास्ताविकम् -

'समानता' बहुव्यापको बहुप्रासङ्गिकश्च सम्प्रत्ययोऽनुभूयते। आध्यात्मिकः, धार्मिकः, सामाजिकः, सांस्कृतिकः, नैतिकः, अर्थशास्त्रीयः, शैक्षिकश्चेत्यादयः अभिप्रायाः समानतासम्प्रत्यये अन्तर्निहिताः भवन्ति। सम्प्रति मानवाधिकाररूपेण मानवविकाससन्दर्भे च समानतायाः चर्चा अत्यन्तं प्रासङ्गिकी मन्यते। इदमधुना वैश्विकचिन्तनं यत् केन माध्यमेन न्यूनातिन्यूनरूपेण च मानवाधिकारचिन्तनं सामान्यचर्चायाः शैक्षिकपाठ्यचर्यायाश्च विषयः स्यात्। पुनश्च मानवाधिकारेषु मानवविकासदृशा च समानता एकः सामान्यः सम्प्रत्ययो वर्तते।[1] एषः सम्प्रत्ययः अतिप्राचीनः, अर्वाचीनश्च। समानतायाः दार्शनिकसम्प्रत्ययः अन्तर्निहितविचारधाराणां विमर्शनमिति। विशेषतः समानता नाधुनिकी अवधारणा इति **श्रुति**रिति- ***समानी व आकूतिः समाना ह्रदयानि वः;समानमस्तु वो मनो यथा वः*** **सुसहासति** इति।[2] श्रुतेरपि समानतायाः मनोभावात्मकार्थः प्राचीनः प्रसिद्धश्च विद्यत एव।


अर्वाचीने सन्दर्भे संयुक्तराष्ट्रसङ्गठनेनापि समर्थितविधिशासनं समानतायाः सिद्धान्तं विधिशासने निहितम् एवस्वीकरोति। सङ्घोद्घोषणायां स्पष्टतया अभिकथितं वर्तते यत् सर्वव्यक्तयः, संस्थाः, स्थापनाः लोकसम्बद्धाः स्वायत्ताः वा, राज्यं स्वयमपि सर्वदा न्यायपूर्णोचित-समानविधिनिमित्तं प्रतिबद्धं स्यात्। अत्र विधेः संरक्षणस्य कापि असमानता विभेदो वा न स्यात्। जाति-लिङ्ग-भाषा-धर्मादिविभेदैः विना सर्वेषां समानाधिकारान् प्रति सम्मानं स्यात्।

समानतायाः सम्प्रत्ययः

भारतीयदर्शनेषु समानतायाः सम्प्रत्ययः तत्त्वमीमांसीयः मूल्यमीमांसीयश्च वर्तते। विविधविभेदाः बाह्याः, ततः पुनः समानविचाराणां प्रार्थनैव। तत्त्वतः वैदिकदर्शनेषु चैतन्यसामान्येन समानता एव। तत्र

[1]http://berlin.wolf.ox.ac.uk/published_works/cc/equality.pdf (Accessed on feb. 27, 2017)
[2]ऋग्वेदः, 10.191.4

जैनबौद्धमतयोरपि जीवमात्रेण समानस्वभाव एव प्रसिद्ध:। प्राय: वैदिकमूल्यमीमांसायां तु समान: व्यवहार: एव आचरितव्य:, तद्यथा- आत्मवत् सर्वभूतेषु। इह समानमेव आचरणीयमिति व्यक्तम्। पाश्चात्यदार्शनिकै: विशेषत: समाजशास्त्रिभि: राजनीतिज्ञै: मनोवैज्ञानिकै: नीतिशास्त्रिभि: च समानताया: सम्प्रत्यय: विशिष्टीकृत: एव। **संयुक्तराष्ट्रसंघेनापि** सामाजिकार्थिकविकासपरिप्रेक्ष्येषु समानता अनिवार्या मता। शिक्षा-व्यवसाय-जीवनविकासादीनाम् अवसराणां समानता अद्यत्वे महत्त्वपूर्णा मन्यते। सामान्यजीवनस्य परिस्थितौ समानताया: सम्प्रत्ययस्य अवबोध: प्रासङ्गिक: इति।



पाश्चात्यदार्शनिकदृष्ट्या स्पष्टसम्प्रत्ययाय **डेरेकपार्फिट** महोदयस्य *इक्वालिटि एण्ड प्रिओरिटी* इति विषय: प्रासङ्गिको वर्तते।[3] **पार्फिट**महोदयेन समानवादिदर्शनस्य पक्षद्वयं प्रतिपादितं- हेतुविधात्मक: समानतावाद:*(Teleological Egalitarianism),* फलनिरपेक्षात्मक: समानतावाद:*(Deontological Egalitarianism)* च। पूर्वपक्षे समानताया: साधुत्वं, उत्तरपक्षे च विशेषहेतुकारणै: विना विशेषपरिस्थितिषु समानताया: व्यवहारा: अपेक्षिता: इति। समानताया: विधिकदर्शनमपि *(Legal Philosophy)* वर्तते यत् विधिमाध्यमेन समानताया: अस्तित्वं सुरक्षितं वर्तते। मुख्यत: लोकचर्चासु लोककल्याणेषु च समानताया: विचार: विधिसम्मतां व्यवस्थां निवेदयति। नैतिकदर्शनं, राजनैतिकविश्लेषणं, विधिकसिद्धान्ताश्चेति समानताया: मूलतत्त्वं निरूपयन्ति।[4]

इण्डिना विश्वविद्यालयस्य **एलन डब्ल्यु. बुड**महोदयस्य विचारेषु वयं सम्पत्ति-शक्ति-संसाधन-जीवनपरिप्रेक्ष्येणां विविधतापूर्णपरिस्थितौ जगति जीवाम:। अथ निरन्तरं एषा विविधता विसङ्गतिरूपेण विषमतापूर्णेन च वर्धमानेति।[5] **मार्क्स**मतेऽपि सामाजिकसन्दर्भेषु समानताया: युक्तय: राजनैतिकदृशा महत्त्वपूर्णा: इति। विसङ्गतिमध्ये सङ्गतिस्थापनायै विधिमाध्यमेनैव*(Rules of Law)* प्रयासा: अपेक्षिता: इति **मार्क्स**स्य विचार:।[6] अत: प्रशासनिकराजनैतिकदृष्ट्या समानताया: सम्प्रत्यय: स्पष्टो भवति।

विलियम इ. ब्रायन: (2010) समानताया: दार्शनिकसम्प्रत्ययं स्पष्टीकरोति। मुख्यत: समानतावादिदर्शनं *(Egalitarian Philosophy)* संसाधन-योग्यता-कल्याणभावना-कल्याणाव-सराणाम् अनुरूपेण समानता व्याख्यायति।[7]**रोनाल्डड्वार्किन**स्य *सोवरेन वर्च्यु* इति पुस्तके संसाधनानां समानताया:

---

[3]http://philosophy.rutgers.edu/joomlatools-files/docman-files/3ParfitEqualityorPriority 2000.pdf (Accessed on March 05, 2017)

[4]Locating Equality: from Historical Philosophical Thought to Modern Legal Norms. (2008). http://www.equalrightstrust.org/ertdocumentbank/LocatingEquality.pdf(Accessed on March 04, 2017)

[5]http://philosophy.fas.nyu.edu/docs/IO/19808/Allen-Wood-Marx-on-Equality.pdf(Accessed on feb. 28, 2017)

[6]http://www.scielo.br/scielo.php?pid=S1414-49802013000100005&script=sci_arttext&tlng=en (Accessed on feb. 26, 2017)

[7]http://go.warwick.ac.uk/wrap (Accessed on feb. 27, 2017)

सिद्धान्तेन समानताया: आर्थिकसम्प्रत्यय: स्पष्ट: भवति। यद्यपि **जे. आर. लुकास, एन्थोनीपल्यु, जानकेकस, फ्रेडरिकहायक, फ्रेडरिकनीत्से**चादय: समानताया: आदर्शरूपेण प्रतिपक्षमेव उररीकुर्वन्ति।[8]

विधिसम्मतेन अर्थशास्त्रेण चापि अवसराणां प्राप्तपरिणामानां च समानताया: नूतन: सम्प्रत्यय: आविर्भवति।**पेरीरा(2012)** स्वमतेऽपि मार्क्सवादिसम्प्रत्यय: अतिमहत्त्वपूर्णो मनुते यत् स्वतन्त्रताया: अस्तित्वमपि समानताश्रितम् एव। निष्कर्षतः विधिसम्मतव्यवहारै: प्रावधानैश्चैव समानता सम्भवा इति।[9] राजनैतिकविचारकेन सामाजिकमनोवैज्ञानिकेन **जॉनलाक**महोदयेन तु प्रशासितसमाजे समानाधिकाराणाम् अनिवार्यताया: समर्थनम् अभिव्यक्तम्।[10] तेन **जीवनाधिकार:** इति पदेन जीवनस्य समानतेति स्वाभिमतं प्रकटितम्। एष: अधिकार एव स्वतन्त्रताया: सम्पत्तेश्च विषये महत्त्वपूर्णो वर्तते। इतोऽपि **जॉनलाक**विचारा: राजनैतिकस्वतन्त्रतातिरिच्य धार्मिकस्वतन्त्रतां, धार्मिकविश्वासमान्यतां च महत्त्वपूर्णां मन्यन्ते। **ट्रीटाइज़** इति स्वपुस्तके **जॉनलाको** भणति यत् सर्वेभ्यः जनेभ्यः समानताया: स्थापना स्यात्।[11]

जॉनलाकमहोदयस्य कृते तु समानता राजनैतिकशक्तीनां केन्द्रं, चालकशक्तिश्चेति यत् व्यक्तीनां समाजे सहभागितां निर्धारयति। निष्कर्षत: **लाकमहोदयस्य** अवधारणा राजनैतिकी वर्तते, यत्समानताया: सम्प्रत्यय: मुख्यत: धर्मराज्ययो: पृथक्करणेन समुदेति यथा **लाक**प्रभावितेन **थॉमसजेफरसनेन** धर्मराज्ययो: पृथक्करणमिति प्रथमतया प्रतिपादितम्।

लैङ्गिकी असमानतापि सम्प्रति महान् विषय:, यत्र **संयुक्तराष्ट्रविकासकार्यक्रमस्य** तु विशेषप्रयास: दृश्यते। स्त्रीसशक्तीकरणस्य विचारोऽपि ऊर्ध्वतया विकासकार्यक्रमेषु स्वीक्रियते। लिङ्गसमानता सम्प्रति मानवीयसमानताया: आधारभूता केन्द्रीकृता च समानता इति। सम्प्रति सुस्थिरविकासस्य वैश्विकी आवश्यकता वर्तते, अत: अस्मिन् प्रसङ्गे प्रजाति-अक्षमता-प्रवासिता-मूलदेशीयतानां कारणै: विविधा: असमानता: अत्र परिहार्याणि एव।[12] समानताया: सम्प्रत्यये विकासकार्यक्रमेण सुस्थिरविकासस्य *(Sustainable Development),*समावेशिप्रभाविप्रजातान्त्रिक-प्रशासनस्य *(Inclusive & Effective Democratic Governance),*समुत्थानशक्तेः *(Resilience)*च त्रीणि तत्त्वानि विमर्शयोग्यानि भवन्ति।[13]

समानताया: सम्प्रत्ययस्पष्टीकरणे **जॉनरॉल्स**महोदयस्य योगदानमपि महत्त्वपूर्णमस्ति। **अट्रेक्टाइन्ग्राम**स्य शब्देषु **जॉनराल्स**महोदयस्यस्वतन्त्रात्मकसमानता *(Liberal Equality)*इति सम्प्रत्यय: अतिमहत्त्वपूर्ण: इति।[14]समानताया: **राल्स**प्रतिपादिते सम्प्रत्यये न्यायस्यसामान्यसङ्कल्पना *(General*

---

[8]उपर्युक्तम्

[9]The Concept of Equality and Well-being in Marx. http://www.scielo.br/scielo.php?pid=S1414-49802013000100005&script=sci_arttext&tlng=en(Accessed on March 03, 2017)

[10]http://www.inquiriesjournal.com/articles/75/john-locke-on-equality-toleration-and-the-atheist-exception (Accessed on March 05, 2017)

[11]उपर्युक्तम्

[12]http://www.undp.org/content/undp/en/home/ourwork/gender-equality/overview.html(Accessed on March 03, 2017)

[13]उपर्युक्तम्

[14]http://www.academia.edu/232994/John_Rawls_as_Philosopher_of_Equality(Accessed on March 03, 2017)

Conception of Justice) अन्तर्निहिता वर्तते यत् सर्वाः प्राथमिक्यः सामाजिकसम्पत्तयः, स्वतन्त्रता अवसराः वा, आयः सम्पत्तयः वा, स्वसम्मानस्य आधारो वा सर्वेभ्यः समानरूपेण वितरणीयाः। (ए थ्यारी ऑफ जस्टिस, 1971)।[15] निष्कर्षतः समानतायाः सम्प्रत्यये न्यायवादितायाः समानावसरप्राप्तेश्चसमावेशो वर्तते।

समानता स्वतन्त्रविचारेषु प्राचीनतमः गहनतमश्च सम्प्रत्ययः यत् प्राकृतिकः तार्किकश्चेत्यपि। सर्वमानवीयोद्देश्यवत् समानतायाः युक्तियुक्ततायाः विचारः समानतायाः अनुभवेनैव प्रमाण्यते। समानतायाः दार्शनिकदृष्टिं स्वीकुर्वता **पॉल ए. फ्रायड**महोदयेन विवेचितं यत् समानतायाः समस्यारुचिपूर्णा वर्तते यतोऽहि एषा समस्या प्रश्नो वा नैतिकनिर्णयार्थं महत्त्वपूर्णः इति।[16] अत्र बिन्दुत्रयं प्रस्तुतम्-

- समानतायाः समस्या विभिन्नसमानव्यक्ति-विकल्प-पदार्थानां तुलनात्मकाध्ययनस्य कारणेन सम्बद्धा भवति ।
- स्वतन्त्रता-प्राधिकारितादिभिः अन्यादर्शैः सह अपि समानतायाः समस्या जटिलतापूर्णां परिस्थितिं जनयति।
- समाजविशेषपरम्पराभिः अपि समानतायाः समस्या जटिला अनुभूयते। इयं भारतीयसमाजस्य परम्पराणां सन्दर्भे तु स्पष्टं वर्तते।

प्रजातान्त्रिकसमाजवादिना **आर. एच. टेनली**महोदयेन तु अवसराणां समानतायाः सिद्धान्तस्य अभिप्रायः '*पूर्णसमानतासमानतयोः नैतिकनिर्णयस्य उत्तरदायित्वात् पलायनस्य प्रयासः एव*', पुनः '*प्रतिस्पर्धायाः क्रूरतावृद्धये एव सशक्तीकरणं*', '*एकाधिकारस्य व्यवहाराणाम् एव हेतुः प्रयास*' चैवेति नकारात्मकाः विचाराः प्रस्तुताः।[17]फ्रांसीसीक्रान्तेः**स्वतन्त्रता, समानता, भ्रातृत्व**श्चेति विचाराश्रितायाः, योग्यतावश्यकतयोः अनुरूपेणैव इति विचाराश्रितस्य मार्क्सवादस्य च प्रभावेन आधुनिकसमाजे समानतायाः सम्प्रत्ययः, प्रथमदृष्ट्याराजनैतिको वर्तते। पुनर्जागरणकालस्य सन्दर्भे इदं स्पष्टं यत् व्यक्तेः स्वतन्त्रता समानता च कियत्पर्यन्तम् आधारभूता मता। **रोनाल्डपेरिक**महोदयेन समानतायाः स्वतन्त्रतावादी सम्प्रत्ययः प्रस्तुतः यत् सर्वेषां सम्मानं सम्बद्धता च महत्त्वपूर्णे इति। अत्र स्वतन्त्रो भूत्वासमानसंसाधनानि प्रति समानाभिगम्यता *(Equal Accessibility)* मुख्या भवति। **रोनाल्ड ड्वार्किन**महोदस्य मतेऽपि समानतायाः सम्प्रत्ययेन लोककल्याणकारिसमाजस्य सार्वभौभिकमूल्यमेव प्रधानमिति।[18]

समानतायाः द्विविधात्मकसम्प्रत्ययः

वर्णनात्मकः, नियमात्मकः च समानतायाः द्विविधात्मकःसम्प्रत्ययः कैश्चित् विज्ञैः प्रतिपादितोवर्तते। यथा **निकोल्सकेपेन्डी**महावर्यानुसारेण विशेषव्यवस्थासु समानता अस्तित्वपूर्णस्थापनानां मध्ये विश्लेषणात्मकः सम्बन्धः एव।[19] वस्तुतः द्वौ पदार्थौ अस्तित्वे वा सर्वपक्षेषु समानौ न भवतः, अन्यथा द्वयोरेव

---

[15]उपर्युक्तम्

[16]http://openscholarship.wustl.edu/law_lawreview/vol1979/iss1/5/ (Accessed on March 05, 2017)

[17]उपर्युक्तम्

[18]http://www.rolandpierik.nl/downloads/ideal.pdf (Accessed on March 01, 2017)

[19]The Meaningof Equality. http://www.hoover.org/sites/default/files/uploads/documents/0817928626_1.pdf (Accessed on March 05, 2017)

अस्तित्वम् असिद्धं भविष्यति। अत्र: **वर्णनात्मकदृष्ट्या** समानता एकमात्राया: गुणवत्ताया: वा स्थितिरेव, यत: पदार्थानां व्यक्तीनां सामाजिकसत्तानां च समानताया: पूर्वानुमानं शक्यं भवति।**नियामकरूपेण** समानतायाः सम्प्रत्ययः स्पष्टीकरोति यत् सर्वे मानवा: वस्तुत: समाना एव। अथ परं तथ्यात्मकसमानताया: व्यवहारेण विशेषरीत्या समानताया: विचार:, व्यवहारो वा आवश्यक:। एषा सङ्कल्पनैव आधुनिकराजनैतिकसामाजिकसमानताया: केन्द्रबिन्दुरिति।

समानताया: त्रिविधात्मकसम्प्रत्यय:


समानता वस्तुतः प्रक्रियात्मकसम्प्रत्यय: *(Process)* । शैक्षिकसन्दर्भे व्यवस्थादृशा समानताया: पूर्वस्थिति: सुनिश्चितनीतय:, उद्देश्यानि, रूपरेखा: इति। अत्र समानताकेन्द्रितनीतय:, सांवैधानिकोपबन्धा:, निर्णयाश्च समानताया: सैद्धान्तिकी पूर्वप्रक्रिया इति। अन्यशब्देषु समानताया: सम्प्रत्यय: त्रिविमात्मको वर्तते- आगतः,प्रक्रिया निर्गतश्चेति। समानताया: व्यवस्थायां संविधानं पूर्वरूपं मुख्यागतवत् *(Input)* कार्यं करोति। श्रुत्यादिधर्मशास्त्रै: नीतिशास्त्रै: समाजराजनीतिशास्त्रैश्चप्रतिपादितसमानता पूर्ववर्ति-आगतरूपेण। शिक्षा स्वतः समानभावेन सर्वेभ्य: उपकरोति। शिक्षादिविभिन्नोपाया: प्रक्रिया *(Process)* एव, समाजशास्त्रदृशा तु समानता सततव्यापकप्रक्रिया। इह सामाजिकसमरसता *(Social Harmony),*सामाजिकविकास:*(Social Development)*चादय: निर्गतरूपेण *(Output)* समानतया सम्बद्धा: इति।

समानताया: चतुर्विधपक्षात्मकसम्प्रत्ययः

समानताया: अवधारणा एतेषां चतुर्विधपक्षाणामाधारेणापि विशदा भवति; ते च पक्षाः नैतिकपक्षः, विधिसम्मतपक्षः, राजनैतिकपक्षः, समाजिकपक्षश्चेति तेषां पक्षाणां विवेचनमपि क्रियते-

- **नैतिकपक्षः**- प्रत्येकं मानव: तुल्य: वर्तते।
- **विधिकसम्मतपक्षः-** विधिसम्मतपक्षे सर्वे समाना: एव।
- **राजनैतिकपक्षः**- विधि-प्रशासनयो: निर्माणे सर्वेभ्यः समाना: अधिकारा:, राजनैतिकानां चयनार्थं समानता च।
- **सामाजिकपक्षः-** योग्यजीवननिर्वहनार्थम् आवश्यकता: प्रति समानम् अभिगमनमिति।

अग्रे चित्रे समानतायाः चत्वारः पक्षाः प्रस्तूयन्ते-



शैक्षिकावसराणां समानता:

किशोरसिंह: (2014) मानवविकासप्रतिवेदनस्य (2012) आधारेण मनुते यत् मानवविकास: अनिवार्यतया स्वभाविकतया च शिक्षया सम्बद्धो वर्तते। अतः विकासोन्मुखचिन्तने शैक्षिकी व्यवस्था सर्वोपरि मन्यते। इह च **यूनेस्को** (2013) प्रतिवेदयति यत् शैक्षिकावसरेषु असमानता चिन्तनीयो विषय: इति। एतत्सर्वं संयुक्तराष्ट्रस्य अन्ताराष्ट्रियमानवाधिकारेषु साधारणसभाप्रस्तावस्य (2012) सन्दर्भेऽपि विचारणीय यत् अनवरतविचारणीययोग्याः विषमता: राष्ट्रे, राष्ट्राणां मध्ये च आविश्वं मानवविकासस्य चयनार्थम् एतासां विषमतानां भ्रष्टपरिपालनानि च सर्वथा सामाजिकदोषा: एव।[20] समानता न केवलम् एकाकी अधिकार:, प्रत्युत अन्यमानवीयाधिकाराणाम् अनुपालनाय आधारभूतः अधिकारोऽयमिति। शिक्षायां विभेदनविरूद्ध-यूनेस्कोप्रतिबद्धता (1960) शिक्षाधिकाराय व्यापक-रूपेण प्रथमतया आह्वायति।

एषा प्रतिबद्धता शैक्षिकावसराणां समानतायै जाति-लिङ्ग-सम्पत्ति-समाजादिविभेदै: विना निर्दिशति। शैक्षिकावसराणां समानतया सम्बद्धानि अन्यप्रावधानानि अपि प्रासङ्गिकानि सन्ति- स्त्रीं प्रति सर्वविभेदोन्मूलनाय प्रतिबद्धता *(CEDAW, 2004),* अक्षमतासहितव्यक्तीनाम् अधिकारेषु संयुक्तराष्ट्रप्रतिबद्धता *(CRPD)* चादय: प्रयासा: शैक्षिकावसराणां समानतायै अपि निर्दिशति।[21]**यूनेस्को**संस्थाया: शैक्षिकावसर-समानतोन्नयनम् (2012) इति प्रतिवेदने गुणवत्तापूर्णशिक्षा प्रति

[20]Right to Education and Equality of Educational Opportunities. CICE Hiroshima University, *Journal of International Cooperation in Education*, Vol.16 No.2 (2014). *pp.*5-19. (Accessed on March 05, 2017)

[21]उपर्युक्तम्

अभिगमनविषय: *(Access)* समानतयामेव अन्तर्निहिता: वर्तन्ते।[22]**जेम्सकालमेन**प्रभृतिभि: (1966) **इक्वालिटी ऑफ एडुकेशनल अपोर्चुनिटि** इति पुस्तके शैक्षिकावसराः समानतया: विषये गुणवत्तापूर्णविद्यालयपर्यावरणस्य प्राधान्यं स्वीकृतम्।

भारते समानताया: वर्तमानस्थितिरपि समीचीना नास्ति। **यूनेस्को**प्रकाशिते एकस्मिन् प्रतिवेदने (2003) **रामचन्द्रनमहोदयेन** प्रमाणिकतया उद्घाटितं यत् भारते विभिन्नप्रान्तेषु विविधा: कार्यक्रमा: योजना: च सञ्चालिता: सन्ति, तथापि बहुविधप्रयासानन्तरमपि शैक्षिकावासरै: प्राप्तलाभदृशा बालिकाबालकेषु विभेदा: अनुभूयन्ते।[23]**ग्रेब्रिलाशुल्जा**दिप्रभृतिभि: अवसराणां समानताया: सन्दर्भे शैक्षिकनीते: व्यापकविश्लेषणेन प्रतिपाद्यन्ते यत् विद्यार्थिसमग्रव्यवहारेषु समानताया: प्रभाव: भवति।[24]

भारतीयपरिप्रक्ष्ये समानताया: विषये राष्ट्रियशैक्षिकयोजनप्रशासनविश्वविद्यालयस्य एकस्मिन् प्रतिवेदने (2014) शासकीयप्राथमिकतासु मुख्योपहुति: असमानतेव। वस्तुतः राज्ये, राज्यानां मध्ये च व्याप्ता समानतैव स्वास्थ्य-शिक्षा-कुशलताविकाससन्दर्भेषु विचारणीया इति।[25] संविधानेऽपि अनुच्छेदा: 14 तः 18 पर्यन्तं विधिसम्मता समानता धर्म-मूलवंश-जाति-लिङ्ग-जन्मस्थानाद्याधारेण विभेदस्य प्रतिषेधः, समानतावसरः, अस्पृश्यतोन्मूलनादयः विषया: महत्त्वपूर्णा: इति। [26]

समानता समता च

समानतासमतयो: मिथ: भेद: सम्प्रति सामाजिकार्थिकविकासपरिप्रेक्ष्येषु महतः चिन्तनस्य विषयोऽयं वर्तते। प्राय: इदृशा: विचारा: प्रवर्तन्ते यत् *'प्रत्येकःमानवःसमानः स्यात्', 'शिक्षेतरविकासाय च प्रत्येकःमानवः समानावसरान् धारयेत्', 'प्रत्येकः विद्यार्थी समानशिक्षाया: प्राप्त्यर्थं समानः एव'।* परन्तु समताया: विचारा: समानतया सह औचित्येन प्रवर्तते। समानव्यवस्थायाः परं विविधताया: विषमताया: च सापेक्षतया औचित्यपूर्णाया: समानताया: व्यवहार: इति।[27]

एल.एच. हेरेरा (2007) अस्मिन् प्रकरणे निरूपयति यत् *समानता समता च सङ्कल्पनस्य द्विविधरूपमिति।* सम्प्रत्ययात्मकरूपेण समत्वस्य औचित्यस्य निष्पक्षताया: वा अभिप्राय: समतारूपेण स्वीक्रियते।[28] तथा च यथा **एंडीस्टेनफोर्डमहोदयो** वदतिसमानतायां मात्राया:, मूल्यस्यचोद्देश्यानां

---

[22]Promoting Equality of Educational Opportunity. (2012). Council of Ministers of Education, Canada. *pp.* 2-3.

[23]Gender equality in education in India: Education for All Global Monitoring Report. (2003). unesdoc.unesco.org/images/0013/001325/132550e.pdf (Accessed on March 05, 2017)

[24]Education Policy and Equality of Opportunity. (2005). Institute for the Study of Labor. Germany. *pp.* 1-3.(Accessed on March 05, 2017)

[25]Education for All: Towards Quality with Equity. (2014). National University of Educational Planning and Administration, New Delhi. *pp.* 3-13.(Accessed on March 04, 2017)

[26]भारतीयसंविधानम्. तृतीयभागः http://indiacode.nic.in/coiweb/coifiles/part.htm(Accessed on March 06, 2017)

[27]http://www.edu.gov.mb.ca/k12/docs/reports/boundaries/5-1.pdf (Accessed on March 04, 2017)

[28]Equity, Equality and Equivalence - A Contribution in Search for Conceptual Definitions and A Comparative Methodology. (2007). Revista Española de Educación Comparada, 13. *pp.* 319-340. (Accessed on March 02, 2017)

समानपरिस्थितिरेव प्रधाना। [29]समानपदं, श्रेणी, सम्मानश्चादयः विषयाः समानतायाम् अन्तर्निहिताः सन्ति।**म्यूरेट-डेमयूज-स्टीनादि**विचारेषु प्रत्यक्षाः असमानाः कारकाः समतायाः अधिकमूल्यंनिर्धारयन्ति, उत समानता तत्र प्रासङ्गिकी न भवति। पुनः **क्रिब-जेबर्ज्ट-राल्सा**दयः न्यायस्य सन्दर्भे समानतायाः परिवर्तितमूल्यं स्वरूपञ्च समतारूपेण स्वीकुर्वन्ति।**कालमेनफोस्टरा**दयोऽपि सामाजिक-सांस्कृतिकपुनरुत्पादितसिध्दान्तानुरूपेण समतायाः सम्प्रत्ययस्य माहात्म्यं प्रतिपादयन्ति।[30]अग्रे एकस्मिन् चित्रे समानता-समतयोः मध्ये निहितविभेदः प्रस्तूयते-



समानता (Equality)	**समता (Equity)**
प्रत्येकः मानवः समानं सहयोगं सहायताञ्च प्राप्नोति, मानवेभ्यः समानाः व्यवहाराः अपेक्ष्यन्ते। अथ च समानतायां प्रक्रिया अपि समाना भवति। परिणामाः मुख्याः न भवन्ति। **यथा**- शिक्षायाः मौलिकाधिकारः (RTE)	अत्र प्रत्येकः मानवः स्वसापेक्षितानाम् आवश्यकतानां सन्दर्भे सहयोगः सहायता वा प्राप्यते। अत्र परिस्थितिसापेक्षिता मानवाय विशिष्टसहायता प्रदीयते। **यथा**- आरक्षणव्यवस्था।

उपसंहारः

निष्कर्षतः समानतायाः सम्प्रत्ययः बहु-आयामी वर्तते। मानवविकासस्य प्रायः सर्वे पक्षाः समानतायाः मूल्यस्य सन्दर्भे विश्लेषणीयाः भवितुमर्हन्ति। आध्यात्मिकः विकासो भवतु भौतिको वा, समानतायाः आधारेण व्यक्तीनां, व्यक्तित्वानां,सर्वे व्यक्तित्वविकासानां च समन्वयनं भवितुम् अर्हति। आस्तिको वा नास्तिको वा, विभिन्नसन्दर्भेषु समानतायाः सम्प्रत्ययस्य प्रासङ्गिकताम् उररीकुर्वन्ति। '**सर्वे भवन्तु सुखिनः**' इति शान्तिमन्त्रेणापिसमानसद्भावनायाः एव अभिव्यक्तिः स्वीक्रियते।

[29]https://www.youtube.com/watch?v=SXpIwJ0LPos (Accessed on March 06, 2017)
[30]Equality of Educational Opportunity. (1966). US Department of Health, Education and Welfare. *p.* 12. (Accessed on March 05, 2017)

सन्दर्भाः

Freund, P. A. (1979). The Philosophy of Equality. Available At: Http://Openscholarship.Wustl.Edu/Law_Lawreview/Vol1979/Iss1/5

Gender Equality in Education in India. New Delhi: UNESCO.

Herrera, L. M. (2007). Equity, Equality and Equivalence - A Contribution in Search for

Huxley, J. (1946). UNESCO - Its Purpose and Its Philosophy. Paris : The United Nations Educational, Scientific And Cultural Organisation.

Indian Government. (2018). Indian Constitution. (https://www.india.gov.in/my-government/constitution-india)

National University of Educational Planning and Administration. (2006). Education For All : Towards Quality With Equity India. New Delhi.

Pereira, A. P. (2014). The Concept of Equality and Well-Being in Marx. R. Katál., Florianópolis, V. 16, N. 1, P. 47-56, Jan./Jun. 2013

Pfeffer, F. T. (2014). Equality and Quality in Education. Michigan : Institute for Social Research, University Of Michigan.

Ramachandran, V. (2003). Gender and Education for All: The Leap To Equality

Schütz, G., Ursprung, H. W., & Woessmann, L. (2005). Education Policy and Equality Of Opportunity. Institute for the Study of Labor.

Sen, A. (1979). Equality of What? The Tanner Lecture on Human Values : Delivered atStanford University on May 22, 1979

Singh, K. (2014). Right to Education and Equality of Educational Opportunities. CICE Hiroshima University, Journal Of International Cooperation In Education, Vol.16 No.2. pp. 5-19.

Wolff, J. (2007) Equality: The Recent History of an Idea. Journal of Moral Philosophy, 4 (1). pp. 125-136.

शिक्षाशास्त्रम्, राष्ट्रियसंस्कृतसंस्थानम्
भोपालपरिसरः, भोपालम्